लुबुच्यते, [1]अयं न वक्तव्यः। [2]किं कारणम्? योगाप्रख्यानात्। [3]न हि पञ्चाला वरणाः इति [4]योगः सम्बन्धः [5]प्रख्या- यते। नैतदुपलभामहे [6]वृक्षयोगान्नगरे वरणाः इति[7]। किं तर्हि? सञ्ज्ञा एताः। तस्मादत्र 'तस्य निवासः' (४.२. ६९/१२८१), 'अदूरभवश्च' (४.२.७०/१२८२) इति [8]तद्धितो नैवोत्पद्यते, किं लुपो विधानेन ॥

## योगप्रमाणे च तदभावेऽदर्शनं स्यात्। (५५/१२९७)

[9]पञ्चालादयः सञ्ज्ञाशब्दाः, न योगनिमित्ताः इत्युक्तम्। तच्चावश्यमेवाभ्युपगन्तव्यम्। योगप्रमाणे हि तद- भावेऽदर्शनं स्यात्[10]। यदि पञ्चालादिशब्दो योगस्य प्रमाणं योगस्य [11]वाचकः स्यात् ततस्त[12]दभावेऽदर्शनमप्रयोगः स्यात्। दृश्यते च सम्प्रति विनैव [13]क्षत्रियसम्बन्धेन जनपदेषु [14]पञ्चालादिशब्दाः, [15]ततोऽवसीयते नायं [16]योगनिमित्तकः। किं तर्हि? [17]रूढिरूपेणैव तत्र [18]प्रवृत्तः इति ॥

## प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्। (५६/१२९८)

अशिष्यम् इति वर्तते। प्रधानं [19]समासे किंचित् पदं, प्रत्ययस्तव्यदादिः। ताभ्यामर्थवचनमर्थाभिधान[20]मनेन प्रकारेण भवति [21]इति पूर्वाचार्यैः परिभाषितम्। 'प्रधानोपसर्जने च प्रधानार्थं सह ब्रूतः' '[22]प्रकृतिप्रत्ययौ सहार्थं ब्रूतः' इति। तत् पाणिनिराचार्यः प्रत्याचष्टे, अशिष्यमेतत् अर्थस्यान्यप्रमाणत्वात् [23]इति। अन्यः इति शास्त्रापेक्षया [24]लोको व्यपदि- श्यते। शब्दैरर्थाभिधानं [25]स्वाभाविकं न [26]पारिभाषिकमशक्यत्वात्। लोकत एवा[27]र्थावगतेः। यैरपि व्याकरणं न श्रुतं तेऽपि राजपुरुषमानय इत्युक्ते राजविशिष्टं पुरुषमानयन्ति न राजानं नापि [28]पुरुषमात्रम्। औपगवमानय इत्युक्ते उप- गुविशिष्टमपत्यमानयन्ति, नोपगुं नाप्यपत्यमात्रं, [29]नोभौ। यश्च लोकतोऽर्थः सिद्धः किं [30]तत्र यत्नेन ॥

## कालोपसर्जने च तुल्यम्। (५७/१२९९)

अशिष्यम् [31]इति वर्तते। कालोपसर्जने चाशिष्ये। [32]कस्मात्? अर्थस्यान्यप्रमाणत्वात्। तुल्यशब्दो हेत्वनुकर्ष- णार्थः। [33]अशिष्यविशेषणं चैतत्। कालोपसर्जने च तुल्यमशिष्ये भवतः। इहान्ये वैयाकरणाः कालोपसर्जनयोः [34]परिभाषां कुर्वन्ति। आन्याय्यादुत्थानादान्याय्याच् च संवेशनात्, एषोऽद्यतनः कालः[35]। अपरे[36] पुनराहुः। अहरुभयतोऽर्धरात्रम्, एषोऽद्यतनः कालः इति। तथोपसर्जनपरिभाषां कुर्वन्ति अप्रधानमुपसर्जनम् इति। तत् पाणिनिराचार्यः प्रत्याचष्टे [37]लोकतोऽ[38]र्थावगतेः। यैरपि व्याकरणं [39]न श्रुतं तेऽप्याहुरिदमस्माभिरद्य कर्तव्यमिदं श्वः कर्तव्यमिदं ह्यः कृतम् इति। [40]नैवं व्युत्पाद्यन्ते[41]। तथोपसर्जनम्, वयमत्र [42]गृहे ग्रामे वा [43]उपसर्जनमप्रधानम् इति गम्यते। यश्च [44]लोकतोऽर्थः सिद्धः किं तत्र [45]यत्नेन। यद्येवं पूर्वसूत्र एव कालोपसर्जनग्रहणं कस्मान् न क्रियते? किमर्थो[46]योगविभागः? प्रदर्शनार्थः। अन्य- दप्येवंजातीयकमशिष्यम् इति। तथा [47]च पूर्वाचार्याः परिभाषन्ते '[48]मत्वर्थे बहुव्रीहिः, पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तर- पदार्थप्रधानस्तत्पुरुषः, उभयपदार्थप्रधानो द्वन्द्वः' इत्येवमादि, [49]तदशिष्यम् इति ॥

---

1. तन्न वक्तव्यम् फ, नास्ति ह. 2. को कारणम् ग. 3. स ग. 4. च इत्यधिकम् ग.क. 5. प्रत्या- ख्यायते तदुपालभामहे ग. 6. वृक्षयागान्नगरे चणाः ब. 7. शब्दाः इति अ. 8. तद्धिताः ह. 9. यदि ड. 10. इति फ. 11. वाचकं ह. 12. योगाभावेऽदर्शनम् अ. ब. ड, तदभावे तस्य फ. 13. क्षत्रियसम्बन्धजनपदे क. ड, क्षत्रियादिसम्बन्धे पदे ह. 14. पंचालशब्दः अ. क. 15. तदेतदवसीयते फ. 16. योगनिमित्तः इति ह. 17. रूढिनिमित्तेनैव फ. ह. 18. प्रवर्तते ह. 19. पदं समासे ग. 20. ⁰मनेक⁰ ह. 21. इति नास्ति ड. ग, पूर्वाचार्यैः परिभाषितम्———ब्रूत इति नास्ति ब. 22. प्रकृतिप्रत्ययार्थे सह ड, प्रकृतिप्रत्ययार्थं सह ब्रूतः फ, प्रकृतिप्रत्ययौ प्रत्ययार्थं ह. 23. इति नास्ति अ. ड. 24. लोके ह. 25. स्वाभाविकत्वात् अ. 26. परिभाषितव्यं अ. क. ड. ग. ह, अशक्यं ह. 27. अर्थगतेः अर्थन्यायात् ड, अर्थावगतिः इति फ. ह. 28. पुरुषमात्रकम् फ. 29. नोभौ नास्ति अ. क. ड. फ. 30. तत्र नास्ति अ. 31. इत्यनुवर्तते ड. 32. कुतः अ. 33. अशिष्ये ह, अशिष्य – भवतः नास्ति क, पूर्वाभ्यामिति स एवान्यप्रमाणत्वादिति इहापि हेतुः फ. ह, आशिषि अपूर्वाभ्याम् ग. 34. भाषां क. 35. इति ग. 36. तु अ. क. ड. 37. लोकत एव ग. 38. अर्थगतेः क. ड. 39. न नास्ति ह. 40. न च अ. क. ड.फ. व्युत्पद्यन्ते ग. 41. प्रस्ता- वादयवौचित्याद्देशकालविभागतः। शब्दैरर्थाः प्रतीयन्ते न शब्दादेव केवलात्। ड. 42. गृहेण वा ब. ह, गृहे कामे वा ग. 43. उपसर्जनभूतोऽप्रधानम् ग. 44. लोक एव प्रसिद्धं ग, अर्थासिद्धः ब, अर्थसिद्धः क. 45. प्रयत्नेन क. 46. योगविभागप्रदर्शनार्थः ग. 47. हि अ.क.ड.फ.ह. 48. मत्वर्थीयः क. 49. तदप्यशिष्टम् ह.